# গজাননস্তোত্রং শংকরাদিকৃতম্

{॥ গজাননস্তোত্রং শংকরাদিকৃতম্ ॥}

শ্রী গণেশায নমঃ ।

দেবা ঊচুঃ ।

গজাননায পূর্ণায সাংখ্যরূপমযায তে ।

বিদেহেন চ সর্বত্র সংস্থিতায নমো নমঃ ॥ ১॥

অমেযায চ হেরম্ব পরশুধারকায তে ।

মূষকবাহনাযৈব বিশ্বেশায নমো নমঃ ॥ ২॥

অনন্তবিভবাযৈব পরেশাং পররূপিণে ।

শিবপুত্রায দেবায গুহাগ্রজায তে নমঃ ॥ ৩॥

পার্বতীনন্দনাযৈব দেবানাং পালকায তে ।

সর্বেষাং পূজ্যদেহায গণেশায নমো নমঃ ॥ ৪॥

স্বানন্দবাসিনে তুভ্যং শিবস্য কুলদৈবত ।

বিষ্ণ্বাদীনাং বিশেষেণ কুলদেবায তে নমঃ ॥ ৫॥

যোগাকারায সর্বেষাং যোগশান্তিপ্রদায চ ।

ব্রহ্মেশায নমস্তুভ্যং ব্রহ্মভূতপ্রদায তে ॥ ৬॥

সিদ্ধি-বুদ্ধিপতে নাথ! সিদ্ধি-বুদ্ধিপ্রদাযিনে ।

মাযিনে মাযিকেভ্যশ্চ মোহদায নমো নমঃ ॥ ৭॥

লম্বোদরায বৈ তুভ্যং সর্বোদরগতায চ ।

অমাযিনে চ মাযাযা আধারায নমো নমঃ ॥ ৮॥

গজঃ সর্বস্য বীজং যত্তেন চিহ্নেন বিঘ্নপ!।

যোগিনস্ত্বাং প্রজানন্তি তদাকারা ভবন্তি তে ॥ ৯॥

তেন ত্বং গজবক্ত্রশ্চ কিং স্তুমস্তবাং গজানন ।

বেদাদযো বিকুণ্ঠাশ্চ শংকরাদ্যাশ্চ দেবপাঃ ॥ ১০॥

শুক্রাদযশ্চ শেষাদ্যাঃ স্তোতুং শক্তা ভবন্তি নঃ ।

তথাপি সংস্তুতোঽসি ত্বং স্ফূর্ত্যা ত্বদ্দর্শনাত্মনা ॥ ১১॥

এবমুক্ত্বা প্রণেমুস্তং গজাননং শিবাদযঃ ।

স তানুবাচ প্রীতাত্মা ভক্তিভাবেন তোষিতঃ ॥ ১২॥

গজানন উবাচ ।

ভবৎকৃতমিদং স্তোত্রং মদীযং সর্বদং ভবেত্ ।

পঠতে শৃণ্বতে চৈব ব্রহ্মভূতপ্রদাযকম্ ॥ ১৩॥

ইতি মৌদ্গলোক্তং গজাননস্তোত্রং সমাপ্তম্ ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gajanana Stotram ( Shankaradi Krutham ) Lyrics in Bengali PDF
% File name : shankarAdikRitaMgajAnanastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)
% Description-comments : mudgalapurANa
% Latest update : March 9, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website